क्र. १०

संस्कृत

# हरतालिका व्रतं

(1)

॥ अथहरितालिकाव्रतकथारंभः॥ हेरंब॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

कथा श्रीगणेशायनमः श्रीगौरीहराभ्यांनमः अथहरितालिकाकथारंभः
१ मंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यांबरायै
चदिगंबरायनमःशिवायैचनमःशिवाय १ पार्वत्युवाच कैलासशिख
रेरम्येगौरीपृच्छतिशंकरं गुह्याद्गुह्यतरंगुह्यंकथयस्वमहेश्वर २ स
र्वेषांधर्मसर्वस्यमल्पायासंमहत्फलं प्रसन्नोमेयदानाथतथ्यंब्रूहिममा
ग्रतः २ केनत्वंहिमयाप्राप्तस्तपोदानव्रतादिना अनादिमध्येनिधनोभ
र्ताचैवजगत्प्रभुः ३ ईश्वरउवाच शृणुदेविप्रवक्ष्यामिव्रतानांव्रतमुत्त
मं यद्गोप्यंममसर्वस्वंकथयामितवप्रिये ४ यथाचोडुगणेचंद्रोग्रहा राम
णांभानुरेवच वर्णानांचयथाविप्रोदेवानांविष्णुरुत्तमः ५ नदीषुच १

(2A)

यथागंगापुराणानांतुभारतं वेदानांचयथासामइंद्रियाणांमनोयथा
६ पुराणंवेदसर्वस्वमागमेनयथोदितं एकाग्रेणश्रृणुष्वेतद्यथादृष्टंपुरा
तनं ७ येनपुण्यप्रभावेनप्राप्तमर्धासनंमम तत्सर्वंकथयिष्येहंत्वंममप्रे
यसीयतः ८ भाद्रेमासिसितेपक्षेतृतीयाहस्तसोमयुक् तदनुष्ठानमात्रे
णसर्वपापैःप्रमुच्यते ९ श्रृणुदेवित्वयापूर्वंयदद्भुतंचरितंमहत् तत्सर्वंक
थयिष्यामियथावृत्तंहिमाचले १० पार्वत्युवाच कथंकृतंमयानाथव्र
तानामुत्तमंव्रतं तत्सर्वंश्रोतुमिच्छामित्वत्सकाशान्महेश्वर ११ ईश्वरउवा
च आसीत्तत्रमहादिव्योहिमवान्नगउत्तमः नानाभूमिसमाकीर्णोना
नाद्रुमसमाकुलः १२ नानापक्षिसमायुक्तोनानामृगविचित्रितः यत्र

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

हरिता यत्रदेवाःसगंधर्वाःसिद्धचारणगुह्यकाः १३ विचरंतियथादेविगंधर्व
२ ध्वनिसंकुलं स्फाटिकैःकांचनैःशृंगैर्मणिवैडूर्यभूषितैः १४ भुंजेल्लिरव
न्निवाकाशंसुहृद्दोमंदिरंयथा हिमेनसहितोनित्यंगंगाध्वनिविनादि
तः १५ पार्वतित्वंतत्रबाल्येपरमाचरतीतपः अब्दद्वादशकुंडेपिधूम्र
पानमधोमुखी १६ संवत्सरंचतुःषष्टिःएकपर्णाशनंकृतं दृष्ट्वातात
ततत्कष्टंचिंतयादुःखितोभवत् १७ कस्मैदेयामयाकन्याएवंचिंतातु
राभवत् तदेवांबरतःप्राप्तोब्रह्मपुत्रःसुधर्मवित् १८ नारदोमुनिशार्दू
लःशैलपुत्रीदिदृक्षया दत्वार्घ्यंविष्टरंपाद्यंनारदायोक्तवान्गिरिः १९ राम
शैलउवाच किमर्थमागतःस्वामिन्वदत्वंमुनिसत्तमः महाभाग्येनसं २

(3A)

प्राप्तंत्वदागमनमुत्तमं २० नारदउवाच शृणुशैलेंद्रमेवाक्यंविष्णुनाप्रेषि
तोस्म्यहं योग्यंयोग्यायदातव्यंकन्यारत्नमिदंत्वया २१ वासुदेवसमोना
स्तिब्रह्मविष्णुशिवादिषु तस्मैदेयात्वयाकन्याअत्रार्थेसंमतंमम २२
गिरिरुवाच वासुदेवःस्वयंदेवःकन्यांप्रार्थयंतेयदि तदामयाप्रदात
व्यात्वदागमनगौरवात् २३ इत्येवंगदितंश्रुत्वातस्यत्वंतर्दधेमुनिः य
धरं योपीतांबरैःशंखचक्रगदाधरं २४ कृतांजलिपुटोभूत्वामुनींद्रस्तंब
भाषत नारदउवाच शृणुदेवभवत्कार्यंविवाहोनिश्चितस्तव २५ हि
मवांस्तुतदागौरीमुवाचवचनंमुदा दत्तासित्वंमयापुत्रीदेवायगरुडध्वजे
२६ श्रुत्वावाक्यंपितुर्देवीसखिभिःसहितावनं सिंहव्याघ्रमृगेर्व्याप्तंत

(५)

ह॰गि॰क॰ नसुप्तासिनिर्जने २७ सख्युवाच किमर्थंदुःखितांदेविकथयस्वममा
३ ग्रतः यन्नोभवत्यभिहितंकरिष्येहंनसंशयः २८ पार्वत्युवाच सखिश्रृणु
ममप्रीतामनोभिलषितामम कपर्दिनंचभर्तारंकरिष्येहंनसंशयः २९
एतन्मेचिंतितंकार्यंतातेनकृतमन्यथा तस्माद्देहपरित्यागंकरिष्येहंसखि
प्रिये ३० पार्वत्यावचनंश्रुत्वानीतासिनमहद्वनं पितानिरीक्षयामासहि
मवांस्तुगृहेगृहे ३१ केननीतासिमेपुत्रीदेवदानवकिन्नरैः नारदायकृ
तंसत्यंकिंदास्येगरुडध्वजे ३२ इत्येवंचिंतयाविष्टोमूर्छितोनिपपात
ह हाहाकृत्वाप्रधावंतिलोकास्तेगिरिपुंगवं ३३ ऊचुस्तुगिरिवरंसर्वेमह हेरंब
र्छोहेतुंगिरींवद गिरिरुवाच दुःखस्यहेतुंश्रृणुतत्कन्यारत्नंहृतंमम द ३

नजानेक्वगतापुत्री केनदुष्टेनवाहृता

(5A) ष्ट्वावाकालसर्पेणसिंहव्याघ्रेणवाहृता ३४ चकंपेशोकसंतप्तोवार्ताभिर्नैव
महानरुः गिरिर्विनाहूनंध्यायात्तदालोकनकारणात् ३५ सिंहव्याघ्रेश्च भ
ल्लूकैरहिभिः सहितंस्वयं त्वंचापिपितृपित्रे घोरेव्रजंतिसखिभिः सह ३६
तत्रदृष्ट्वानदींरम्यांतत्तीरेचमहागुहां तांप्रविश्यसखीसार्धमन्नभोगवि
वर्जिता ३७ संस्थाप्यवालुकापिंडं पार्वत्यासहितंमम यातृतीयाभाद्रपदे
हस्तनक्षत्रसंयुता ३८ तत्रवादित्रगीतेनरात्रौजागरणंकृतं तेनव्रतप्रभा
वेनआसनंचलितंमम ३९ संप्राप्तोहंतदातत्रयत्रत्वंसखिभिःसह प्रस
न्नोस्मिमयाप्रोक्तंवरंब्रूहिवरानने ४० पार्वत्युवाच यदिदेवप्रसन्नो
सिभर्ताभवतुमेहरः तथेत्युक्त्वातुतांदेविकैलासंपुनरागतः ४१ ततः

(5)

हरिता.क. प्रभातेसंप्राप्तेनद्यांसर्वंविसर्जितं पारणंतुकृतंतत्रसख्यासार्धंत्वया
४ शुभं ४३ हिमवानपितंदेशमाजगामवनंघनं चतुराशानिरीक्षंस्तु
विह्वलःपतितःपुनः ४४ दृष्ट्वातत्रनदीतीरेप्रसुप्तंकाद्वयं उत्थाप्योरुन्य
स्तंगमारोप्यरोदनंकृतवान्गिरिः ४५ सिंहव्याघ्रादिभल्लूकवनेदुष्टे
कुतःस्थिता पार्वत्युवाच शृणुतातमयाज्ञातंत्वंदास्यसीश्वरायमां ४६
तदन्यथाकृतंतातंतेनाहंवनमागता ददासितातयदिमामीश्वरायतदा
गृहं ४७ आगमिष्यामिनैवंचेदिहस्थास्यामिनिश्चितं तथेत्युक्त्वाहिम
वतानीतासित्वंगृहंप्रति ४८ पश्चाद्दत्तात्वमस्माकंकृत्वाविवाहिकींक्रि याम
यां तेनव्रतप्रभावेनसौभाग्यंसाधितंत्वया ४९ अद्यापिव्रतराजस्तु ४

नकस्यापिनिवेदितः नामास्यव्रतराजस्यशृणुदेवियथाभवत् ५० आ
(5A) लिभिर्हरितायस्मात्तस्मात्साहरितालिका पार्वत्युवाच नामेदंकथितं
तस्यविधिंवदममप्रभो ५१ किंपुण्यंकिंफलंचास्यकेनचक्रियतेव्रतं ॥
ईश्वरउवाच शृणुदेविविधिंवक्ष्येनारीणांव्रतमीदृशं ५२ करिष्यसि
प्रयत्नेनयदिसौभाग्यमिच्छसि तोरणादिप्रकर्तव्यंकदलीस्तंभमंडितं ५३
आच्छाद्यपट्टवस्त्रैस्तुनानारत्नविचित्रितैः चंदनेनसुगंधेनलेपयेद्गृह
मंडपं ५४ शंखभेरिमृदंगैस्तुकारयेद्बहुनिस्वनैः नानामंगलगीतं
चकर्तव्यंममसद्मनि ५५ स्थापयेद्वालुकालिंगंपार्वत्यासहितंमम ॥
पूजयेद्बहुपुष्पैश्चगंधधूपादिभिर्नवैः ५६ नानाप्रकारैर्नैवेद्यैः पूज

(6)

हरि० कृ० येज्जागरंचरेत नारिकेलैः पूगफलैर्जंबीरैर्बकुलैस्तथा ५७ बीज

५ पूरैस्सनारिंगैः फलैश्चान्यैश्च भूरिशः ऋतुकालोद्भवैर्भूरिप्रकारैः

कंदमूलकैः ५८ धूपादिगंधैश्च तथा मंत्रेणानेन पूजयेत नमःशि

वाय शांताय पंचवक्त्राय शूलिने ५९ नंदिभृंगिमहाकालगुणयुक्ता

य शंभवे शिवायै हरकांतायै प्रकृत्यै सृष्टिहेतवे ६० शिवायै सर्वमां

गल्यै शिवरूपे जगन्मये शिवे कल्याणदे नित्यं शिवरूपे नमोस्तु ते ६१

शिवरूपे नमस्तुभ्यं शिवायै सततं नमः नमस्ते ब्रह्मरूपिण्ये जगद्धात्र्यै

नमो नमः ६२ संसारभयसंतापात्त्राहि मां सिंहवाहिनि येन कामेन राम

देवि त्वं पूजितासि महेश्वरि ६३ राज्यसौभाग्यसंपत्तिर्देहि मामंबपा ५

(6A)

र्वेति मंत्रेणानेनंदेविल्वांपूजयित्वामयासह ६४ कथांश्रुत्वाविधानेन
दद्यादन्नंचभूरिशः ब्राह्मणेभ्योयथाशक्त्यादेयावस्त्रहिरण्यगाः ६५
अन्येभ्योदीयतेभूरिस्त्रीणांभूषणादिकं भर्त्रासहकथांश्रुत्वाभक्ति
युक्तेनचेतसा ६६ कृत्वाव्रतेश्वरंदेविसर्वपापैःप्रमुच्यते सप्तज
न्मभवेद्राज्यंसौभाग्यंचैववर्धते ६७ तृतीयायांतुयानारीआहारं
कुरुतेयदि सप्तजन्मभवेद्वंध्यावैधव्यंजन्मजन्मनि ६८ दारिद्र्यंपुत्र
शोकंचकर्कशादुःखभागिनी पच्यतेनरकेघोरेनोपवासंकरोतिया ६९
राजतेकांचनेताम्रेवेणवेवाथमृन्मये भाजनेविन्यसेदन्नंसवस्त्रफलद
क्षिणं ७० वायनंद्विजवर्यायदद्यादंतेचपारणं एवंविधंयाकुरुतेचना

हरि० कथा रीत्वयासमानारमंतेसभर्त्रा भोगाननेकान्भुविभुज्यमानासायुज्यमंते
६ लभंतेहरेण ७१ अश्वमेधसहस्राणिवाजपेययशतानिच कथाश्रवणमा
त्रेणतत्फलंप्राप्यतेनरैः ७२ एतत्तेकथितंदेविव्रतवांग्रेव्रतमुत्तमं कोटि
(७) यज्ञकृतंपुण्यमस्यानुष्ठानमात्रतः ७३ इतिभविष्योत्तरपुराणेहरिता
लिकाव्रतकथासमाप्ता श्रीगिरिधरार्पणमस्तु हरयेनमः ३ श्रीरुक्मि
णीपांडरंगार्पणमस्तु शके १८०९ सर्वजिन्नामाब्देश्रावणकृष्णाष्टम्यां
भृगाविदंपुस्तकंसंगृहीतं स्वार्थंपरार्थंच लेखकपाठकयोःशुभंभ
वतु माधवसुतधोंडोजीनसिगिपं तपांडते श्रीगणपतेऽर्पणमस्तु राम
यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया यदिशुद्धमशुद्धंवाममदोषोनविद्यते ६

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com